# Shri Chidambara Ashtakam 1

# શ્રીચિદમ્બરાષ્ટકમ્ ૧

## Document Information

Text title : Chidambara Ashtakam 1

File name : chidambarAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Transliterated by : Shankara and P. S. Ramachandran

Proofread by : Shankara, PSA Easwaran

Latest update : December 11, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

Shri Chidambara Ashtakam 1

# શ્રીચિદમ્બરાષ્ટકમ્ ૧

બ્રહ્મમુખામરવન્દિતલિઙ્ગં જન્મજરામરણાન્તકલિઙ્ગમ્ ।
કર્મનિવારણકૌશલલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૧॥

કલ્પકમૂલપ્રતિષ્ઠિતલિઙ્ગં દર્પકનાશયુધિષ્ઠિરલિઙ્ગમ્ ।
કુપ્રકૃતિપ્રકરાન્તકલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૨॥

સ્કન્દગણેશ્વરકલ્પિતલિઙ્ગં કિન્નરચારણગાયકલિઙ્ગમ્ ।
પન્નગભૂષણપાવનલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૩॥

સાંબસદાશિવશઙ્કરલિઙ્ગં કામ્યવરપ્રદકોમલલિઙ્ગમ્ ।
સામ્યવિહીનસુમાનસલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૪॥

કલિમલકાનનપાવકલિઙ્ગં સલિલતરંગવિભૂષણલિઙ્ગમ્ ।
પલિતપતંગપ્રદીપકલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૫॥

અષ્ટતનુપ્રતિભાસુરલિઙ્ગં વિષ્ટપનાથવિકસ્વરલિઙ્ગમ્ ।
શિષ્ટજનાવનશીલિતલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૬॥

અન્તકમર્દનબન્ધુરલિઙ્ગં કૃન્તિતકામકલેવરલિઙ્ગમ્ ।
જન્તુહૃદિસ્થિતજીવકલિઙ્ગં તન્મૃદુ પાતુ ચિદંબરલિઙ્ગમ્ ॥ ૭॥

પુષ્ટધિયસ્સુ ચિદંબરલિઙ્ગં દૃષ્ટમિદં મનસાનુપઠન્તિ ।
અષ્ટકમેતદવાઙ્મનસીયં અષ્ટતનું પ્રતિ યાન્તિ નરાસ્તે ॥ ૮॥

ઇતિ શ્રીનારાયણગુરુવિરચિતં શ્રીચિદમ્બરાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded by Shankara and P. S. Ramachandran
Proofread by Shankara, PSA Easwaran

*Shri Chidambara Ashtakam 1*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*